# श्रीमद् भागवत रसिक कुटुंब

## श्रीकनकधारास्तोत्रम्

**अङ्गं(म्) हरेः(फ्) पुलकभूषणमाश्रयन्ती,**
**भृङ्गाङ्गनेव मुकुलाभरणं(न्) तमालम् ।**
**अङ्गीकृताखिलविभूतिरपाङ्गलीला,**
**माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥ 1॥**

**मुग्धा मुहुर्विदधती वदने मुरारेः(फ्),**
**प्रेमत्रपाप्रणिहितानि गतागतानि ।**
**माला दृशोर्मधुकरीव महोत्पले या,**
**सा मे श्रियं(न्) दिशतु सागरसम्भवायाः ॥ 2॥**

**विश्वामरेन्द्रपदविभ्रमदानदक्ष-**
**मानन्दहेतुरधिकं(म्) मुरविद्विषोऽपि ।**
**ईषन्निषीदतु मयि क्षणमीक्षणार्ध-**
**मिन्दीवरोदरसहोदरमिन्दिरायाः ॥ 3॥**

**आमीलिताक्षमधिगम्य मुदा मुकुन्द-**
**मानन्दकन्दमनिमेषमनङ्गतन्त्रम् ।**

आकेकरस्थितकनीनिकपक्ष्मनेत्रं(म्),
भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ 4॥

बाह्वन्तरे मधुजितः(श्) श्रितकौस्तुभे या,
हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला,
कल्याणमावहतु मे कमलालयायाः ॥ 5॥

कालाम्बुदालिललितोरसि कैटभारेर्-
धाराधरे स्फुरति या तडिदङ्गनेव ।
मातुः(स्) समस्तजगतां(म्) महनीयमूर्तिर्-
भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ 6॥

प्राप्तं(म्) पदं(म्) प्रथमतः(ख्) किल यत्प्रभावान्,
माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं(म्),
मन्दालसं(ञ्) च मकरालयकन्यकायाः ॥ 7॥

दद्याद् दयानुपवनो द्रविणाम्बुधारा-
मस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं(न्),
नारायणप्रणयिनीनयनाम्बुवाहः ॥ 8॥

इष्टा विशिष्टमतयोऽपि यया दयार्द्र-
दृष्ट्या त्रिविष्टपपदं(म्) सुलभं(लँ) लभन्ते ।
दृष्टिः(फ्) प्रहृष्टकमलोदरदीप्तिरिष्टां(म्),
पुष्टिं(ङ्) कृषीष्ट मम पुष्करविष्टरायाः ॥ 9॥

गीर्देवतेति गरुडध्वजसुन्दरीति,
शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै,
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ 10॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै,
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै,
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ 11॥

नमोऽस्तु नालीकनिभाननायै,
नमोऽस्तु दुग्धोदधिजन्मभूत्यै ।
नमोऽस्तु सोमामृतसोदरायै,
नमोऽस्तु नारायणवल्लभायै ॥ 12॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानविभवानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि,

**मामेव मातरनिशं(ङ्) कलयन्तु मान्ये ॥ 13॥**

**यत्कटाक्षसमुपासनाविधिः(स्),**

**सेवकस्य सकलार्थसम्पदः ।**

**सन्तनोति वचनाङ्गमानसैस्-**

**त्वां(म्) मुरारिहृदयेश्वरीं(म्) भजे ॥ 14॥**

**सरसिजनिलये सरोजहस्ते,**

**धवलतमां(म्)शुकगन्धमाल्यशोभे ।**

**भगवति हरिवल्लभे मनोज्ञे,**

**त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ 15॥**

**दिग्घस्तिभिः(ख्) कनककुम्भमुखावसृष्ट -**

**स्वर्वाहिनीविमलचारुजलप्लुताङ्गीम् ।**

**प्रातर्नमामि जगतां(ञ्) जननीमशेष-**

**लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ॥ 16॥**

**कमले कमलाक्षवल्लभे त्वं(ङ्),**

**करुणापूरतरङ्गितैरपाङ्गैः ।**

**अवलोकय मामकिञ्चनानां(म्),**

**प्रथमं(म्) पात्रमकृत्रिमं(न्) दयायाः ॥ 17॥**

**स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं(न्),**

त्रयीमयीं(न्) त्रिभुवनमातरं(म्) रमाम् ।

गुणाधिका गुरुतरभाग्यभागिनो,

भवन्ति ते भुवि बुधभाविताशयाः ॥ 18॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं(ङ्) कनकधारास्तोत्रं(म्) सम्पूर्णम् ॥

